National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 170-172
© 2025 NJHSR
www.sanskritarticle.com

**जगदीशनन्दः**
शोधछात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**जगदीशनन्दः**
शोधछात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# हर्षदेवमाधवस्य बुद्धस्यभिक्षापात्रे काव्ये पर्यावरणचिन्तनम्

**जगदीशनन्दः**

जलमेव जीवनम्। जलं नास्ति चेत् जीवनमपि न स्यात् जलं विना कृषिकार्यमपि न सम्भवेत्। कृषिकार्यादिकर्तुं वर्षाजलमेव मङ्गलकारकम्। समुचितसमये वृष्टिः भवति चेत् कृषिकार्यमपि समुचिततया भवति। शुष्काः वृक्षा अपि जलं प्राप्य हरितवर्णायन्ते। शिशवः कर्गजनौकां कृत्वा जले क्रीडन्ति। पर्वतादिषु जनाः म काष्ठमानेतुं फलसंग्रहार्थं च अग्निं संयोजयन्ति तेन पर्वतेषु स्थिताः वृक्षाः विनाशं गच्छन्ति। कविः कथयति तेन पर्वतहृदयं रोदिति।[1] अतः समुचितसमये वर्षा भवति चेत् सर्वं रमणीयं सुखकरं च भवति।

अत्र कविः पर्यावरणस्य सुरक्षाविषये प्रतिपादयति । वस्तुतस्तु अयमस्ति वाच्यार्थः। अत्र अपरः अपि निगूढः अर्थः विद्यमानोऽस्ति। वर्षाः इति कविता जीवनमूल्यं विशेषतया प्रदर्शयति। तत्र विविधसाहित्यिकविषयाणां तथा च पौराणिकविषयाणां सम्यक् अवगाहनं कृत्वा कविः वर्षाः इति कवितां लिखति। अस्याः कवितायाः उपदेशं यदि वयं विचारयामः तर्हि अत्र विशेषतया विशिष्टकविनां काव्यसौन्दर्यम् उपदेशरूपेण वर्तते तत्र महाकविकालिदाशः, आदिकविः बाल्मिकी अन्ये बहवः काविपुङ्गवाः अत्र वर्णिताः सन्ति। ये तावत् कवयः विविधप्रकारेषु समाजं स्वस्वकाव्ये उपदिष्टवन्तः। कविः लिखति- “वातायनेषु, तमिश्रपटिका: विस्तरन्ति”[2]। कविरत्र व्यङ्गं योजयति। वातायनं भवति गृहस्य आलोकनिमित्तं कश्चन गवाक्षविशेषः। वातायनमाध्यमेन सूर्यरश्मी एवमेव वायुः गृहं प्रति प्रविशति। परन्तु अत्र व्यंग्येन कविः कथयति वातायनेषु तमिस्रपटिकाःविस्तरन्ति। तमिस्रपटिकाः नाम Window Screen इति यत् आङ्ग्लभाषायां कथ्यते अर्थात् वातायनस्य अवरोधं कर्तुं या पट्टिका व्यवह्लीयते सा पट्टीका भवति तमिस्रपट्टिकाः अर्थात् वातायनमार्गे य: आलोकः आगच्छति तस्य आलोकस्य निवारणं तु तमिस्रपट्टिकाः अर्थात् अन्धकारपटिकाः विस्तरन्ति। तर्हि कवेः कथनस्य अभिप्रायः यत् आलोकप्रदानकर्मणि अस्य वातायनस्य व्यवहारः। तस्य वातायनस्य तमिस्रपटिकायां विधानं कृत्वा जनाः आनन्दमनुभवन्ति केषुचित् स्थलेषुः। अतः अत्र ज्ञानस्य प्रकाशनाय जनानां कदाचित् स्पृहा न भवति अथवा केन चित् कारणेन जनाः ज्ञानस्य स्थाने अज्ञानस्य अन्धकारस्य च ग्रहणं कुर्वन्ति। व्योम भवति नेत्रयोः कुतूहलम्। व्योम नाम आकाशः। तदानीं आकाशः भवति नेत्रयोः कुतूहलम्।[3] नेत्रे केवलं शून्यत्वमेव परिलक्षते। मार्गा नदीनां पादान् प्राप्नुवन्ति। नद्यो लभन्ते अप्सरसां पक्षान्। अप्सरसो लभन्ते अश्रुकोमलानि वस्त्राणि । अत्र नदीजलस्य विषये कविः वर्णयति। नद्यां यदा जलप्रवाहः भवति तदानीमेव मार्गाः नदीनां पादान् प्राप्नुवन्ति । तदानीमेव समाजस्य कृते मार्गदर्शनं भवति । नदी मार्गदर्शनं करोति। समाजे कथं तावत् जीवनं नदीवत् सर्वथा चलचञ्चलं भवेदिति। "वृक्षाः हरितवर्णाः कर्गजनौकाः कृत्वा क्रीडन्ति जले।.......चीत्काराः प्रवहन्ति।”[4] अत्र –प्रकृतिवर्णनां करोति कविः । प्रकृतिः सम्प्रति असहाया वर्तते।

पर्वतः भवतु उत नदी भवतु अथवा काननं भवतु सर्वत्र आधुनिकतायाः प्रभावः परिलक्षते । तमसानदी या नदी अत्यन्तं पवित्रतमा आसीत् यत्र बाल्मीकिमहर्षिः सिद्धिं प्राप्तवान् आसीत्। यस्यां नद्यां स्नानं कृत्वा सः रामायणं लिखितवान् अस्ति सा नदी अधुना कुत्र वर्तते। सा नदी अधुना मलिना वर्तते। दण्डकारण्यं यत्र अनेके सन्यासिनः साधनरताः आसन् कुत्र अस्ति तत् दण्डकारण्यं, तदपि अधुना आधुनिकतायाः

प्रभावेण प्रभावितं वर्तते। एवमेव तत्र रामपर्वतः यत्र अभिशप्तयक्षः मेघमाध्यमेन स्वप्रियां प्रति पत्रं प्रेषयति स्म। सः रामगिरीपर्वतः सा गुहा सम्प्रति न दृश्यते। अतः सर्वमपि पवित्रस्थलं यत्र यत्र पवित्रस्थले ऋषयः कवयः साधनां कृत्वा समाजस्य कृते अपूर्वं काव्यरत्नं दत्तवन्तः तत्तत् स्थलं सम्प्रति अत्यन्तं दुखदस्थितौ वर्तते। अतः कविः कथयति “अश्रुषु तमसा नदी प्रवहति। तमसायां चीत्काराः प्रवहन्ति”[5]। तमसा नदी सम्प्रति तमसा एव नास्ति। तमसा सम्प्रति अन्धकारे वर्तते। अतः तैदृशी स्थितिः सम्प्रति समग्रे भारते न तु केवलं भारते, अपितु समग्रे विश्वे वर्तते। पवित्रस्थलानि नष्टरूपेण अधुना अस्माकं पुरतः प्रतिभान्ति । एवमेव-

क्रौञ्चचित्कारेषु ऋषि-हृदयं प्रवहति।
गगनं तमसा-शरीरं भूत्वा क्रन्दति।।
वृक्षपर्णानि ऋषि-हृदयानि भूत्वा द्रवन्ति।।[6]

यस्मिन् अरण्ये ऋषयः अपि च कावयः साधनां कृत्वा अत्यन्तं सौन्दर्य्याभिभूतं रचितवन्तः यथा अभिज्ञानशाकुन्तले आश्रमवर्णनं भवतु अथवा कुमारसम्भवे हिमालयस्य सौन्दर्यवर्णनं भवतु तत् स्थलं सम्प्रति अत्यन्तं नष्टं भवति । कुत्रापि हिमालये सम्प्रति पर्यटकाः केवल पर्यटनमेव कुवन्ति । सर्वत्र वर्तते केवलं समस्या। समस्यायाः समाधानं कुत्रापि न भवति प्रत्युत समस्यायाः वर्द्धनं प्रतिदिनं जायते। अत: तदेव सः कथयति तमसाया: तटे कौञ्चद्वन्दवियोगं दृष्ट्वा यः बाल्मीकिः रामायणं लिखितवान् सम्प्रति सा तमसा नदी अत्यन्तं खिन्ना वर्तते । दण्डकारण्यमपि अत्यन्तं शुष्कत्वं दृश्यते ।

मम नेत्रे दण्डकारण्यस्य
पाषाणशिले भूत्वा द्रवतः।
अप्सरसो विद्युति स्मितं दत्वा गच्छति....
मेघो निर्वस्त्रः पुरूरवा भूत्वा धावति......
हृदयं दण्डकारण्य-ग्रावा भूत्वा.... ।।[7]

अतः दण्डकारण्यस्य पाषाणशीलाः सम्प्रति द्रवीभूता-अवस्थायां वर्तन्ते । यतः सम्प्रति अरण्यं नास्ति । शीलाखण्डा: ये वर्तन्ते कालान्तरे शिलाखण्डानां नष्टत्वमपि अस्माभिः द्रष्टुं शक्यते। एवमेव -अप्सरसो विद्युति स्मितं दत्वा गच्छति....

मेघो निर्वस्त्रः पुरूरवा भूत्वा धावति...... ।
हृदयं दण्डकारण्य-ग्रावा भूत्वा.... ।।[8]

अर्थात् पुरुरवा-उर्वशीसम्वादं[9] यदि वयं पश्यामः तत्र वेदे भवतु अथवा उपनिषत्सु भवतु शक्यते । सम्प्रति प्रेमभावः विश्वे नास्ति एव प्रेमभावनायाम् अत्र अत्र विविधव्याघाताः समगच्छन्ति अतः नास्ति प्रेम, न वा तत्र अरण्यसुरक्षा, न वा नदीसुरक्षा न वा संसारस्य सुरक्षा अतः कविः कथयति वातायनेषु तमिस्रपटिकाः विस्तरन्ति। तर्हि यत्र यत्र आलोकराशयः आसन्न् तत्र तत्र सम्प्रति तमिस्र पटिकाः भवन्ति। यत्र यत्र वातायनात् आनन्दस्य वायुः प्रवहति स्म। सम्प्रति तमिस्रपटिका कारणात् सदा आनन्दवायुः च शुद्धवायुः सम्प्रति नागच्छति । अतः गृहं सम्प्रति तमिस्रपटिकया अन्धकारवत् वर्तते विश्वमपि तथैव अन्धकारवत् अस्तीति कवेः भावना ।

वृक्षः रक्षति रक्षितः[10] इत्यनुसारं सुरक्षितः वृक्षः जनान् रक्षति। देशः अग्रे सरति, आधुनिकता आगतेतेयादि विविधवचनछलेन वयं वृक्षाणां रोपणं कुर्मः। शिल्पागारस्थापनार्थम् अरण्यक्षेत्राणि क्रमशः विनष्टानि भवन्ति। प्रतिवर्षं मार्गाणां सम्प्रसारणाय भवत्वथवा भवनानां निर्माणाय बहुसंख्यायां वृक्षाणां छेदनं भवति । प्रकृतिप्रेमी माधवोऽयं परिवेशस्य पर्यावरणस्य च सुरक्षाविषये चिन्तयन् वृक्षः इति कविता उपस्थापिता। अत्र वृक्षस्य किं तावत् महत्वमिति विषये सम्यग्रूपेण प्रतिपादयति।

वुद्धस्य अवतारेषु अन्यतमः अवतारः वोधिसत्वः। यः जनानामुपकाराय शतवारं स्वप्राणान् त्यक्तवान् । सः वोधिसत्वः यदा गृहस्य सुखं त्यक्त्वा वनमगच्छत् तदा एकस्मिन् वृक्षतले तपस्यामकरोत्। तस्यैव वृक्षस्य छायायामेव उपविश्य भगवन्तम् अस्मरत् । अतः कविः कथयति –

“वृक्षस्य च्छायायां बोधिसत्वस्य शान्तिरस्ति ।”[11]

भगवान्-श्रीकृष्णः अपि स्ववाल्यकालं कदम्बवने एव अतिवाहितवान्। कदम्बवृक्षस्याधः उपविश्य वंशीं वादयन् सर्वान् मोहयति स्म । यस्य वंशीस्वनं श्रोतुं सर्वेऽपि अपेक्षारताः आसन् तस्य श्रीकृष्णस्य वंशीस्वरस्तु कदम्बवृक्षस्यमूलादेव आयाति । यदि वृक्षः न तिष्ठति चेत् कथं एतद् सम्भवति स्म । कविः कथयति-

पर्णेषु कृष्णसङ्गीतमाधुर्यम्
शाखासु महावीरस्य तितिक्षाः।।[12]

४२ वर्षवयसि भगवान्महावीरः रिजुपालिकानद्याः तटे एकस्मिन् सालवृक्षस्याधः साधनां कृत्वा कैवल्यं प्राप्तवान्। वृक्षः न केवलमेवमस्माकमुपकारं करोति अपितु पूर्वमेव महापुरुषाणामपि बहूपकारं करोति स्म । यदा शकुन्तला स्वपतिगृहं गच्छति तदा वृक्षाः अश्रुरूपेण स्वपत्राणि अधः पातयन्ति यतोहि सा शकुन्तला वृक्षेभ्यः जलं न दत्वा स्वयं न खादति । वृक्षेषु यदा कुसुमानि आयान्ति तदा यस्याः उत्सवः भवति सा भवति शकुन्तला। उच्यते-

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
ना दत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।।[13]

एतादृशानां वृक्षाणां वयं यत्नं त्यक्त्वा यदि च्छेदनं कुर्मः तर्हि स्वयमेव शान्त्या जीवितुं न शक्नुमः। किञ्च याज्ञबल्क्येनापि याज्ञबल्क्यस्मृतेः रचना एकस्मिन् वृक्षमूले एव उपविश्य कृता । अतः अस्माकं परमं कर्तव्यमस्ति वयं सर्वे मिलित्वा यथाशक्तिं वृक्षाणां रोपणं कुर्मः।

परमात्मना जीवेषु आत्मा दत्ता। यथा प्रत्येकस्य जीवस्य समीपे आत्मा वर्तते तथैव वृक्षे प्रत्येकमपि पत्रम् आत्मावत् वृक्षत्वमनुभावयति। अर्थात् यथा वृक्षात् एकमपि पर्णं च्युतं न भवेत् तथैव अस्माभिः कार्यं कर्तव्यम् । यथा प्रत्येकेषु प्राणिषु वयं जीवनत्वात् व्यवहारं कुर्मः तथैव वृक्षेष्वपि कृत्वा एकमपि पर्णं न चिनुमः तर्हि तदेव आत्मसाक्षात्कारोऽस्ति इति कविः कथयति। यथा-

एकमपि पर्णं वृक्षत्वमनुभवेत्

स एवात्मसाक्षात्कारोऽस्ति।।[14]

यदा वृक्षात् पत्राणि पतन्ति तदा सः कष्टमनुभवति । नीरसतरुवरं को वा द्रष्टुमिच्छेत् । तस्मिन्नेव पर्णशून्यवृक्षे यदा विहगाः आगत्य तस्य शाखासु उपविशन्ति तदा वृक्षः पर्णपतनव्यथां विस्मरति । तथैव अस्माकं जीवनेऽपि महद्दुखस्य समये यदि को॥पि आगत्य अस्माकं सविधे तिष्ठति अस्मान् आश्वासयति तर्हि पूर्वस्थितस्य कष्टस्य लाघवः भवति ।

वृक्षः अस्मानु शिक्षा ददाति यत् कथं कष्टसमये दुःखसमये धैर्येण सह स्थातव्यम्। सूर्यातपं सोढ्वा वात्यासारेण सह युद्धं कृत्वा कथं दण्डायमानः स्थातव्यः तत् वृक्षः शिक्षा ददाति। मनुष्यस्य जीवने सुखं कदाचित् दुःखमपि आगच्छेत् परन्तु यदि दुःखसमये वयम् अस्थिराः भवामः तर्हि जीवनस्य आनन्दं प्रातुं वयमक्षमाः भवामः। वृक्षः कथयति दुःखसमये दण्डायमानास्थित्वा कष्टस्य दुःखस्य वा सम्मुखीनः कर्तव्यः। यथा ग्रीष्मप्रतापस्य अनन्तरं वर्षा आगच्छति वृक्षेषु नूतनानि पत्राणि आयान्ति तथैव मानवः यदि दुःखसमये स्थिरः भवति चेत् तदनन्तरम् वश्यमेव सुखमागमिष्यति । यतोहि उच्यते -

सुखमापतितं सेव्यं दुःखमापतितं तथा।

चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।।[15]

वृक्षः नीर्जिवभूत्वाऽपि अस्मान् शिक्षा प्रददाति अतः वृक्षात् शिक्षाग्रहणं कृत्वा साहसं धारणीयम् । कविः कथयति-

वृक्षः अर्थात् सूर्यातपं सोढुं शक्तिः,

वात्यासारेण सह योद्धुं साहसम्।

शिशिरे हरितस्वप्नस्य जिजीविषा।।[16]

अस्यां कवितायां सर्वत्रापि पर्यावरणस्य सुरक्षानिमित्तं वृक्षस्य आवश्यकता विषये वर्णनमस्ति। तेन सह वृक्षः अस्मान् का शिक्षा प्रददाति तस्मिन्नपि विषये सम्यक् रूपेण वर्णनं वर्तते ।

**सन्दर्भग्रन्थसूची**


| पुस्तकस्य नाम | लेखकः | प्रकाशनसंस्था |
|---|---|---|
| 1. बुद्धस्य भिक्षापात्रे | डॉ. हर्षदेवमाधवः | परिमल पब्लिकेशन्स, खक्तिनगर |
| 2. हितोपदेशः | नारायणपण्डितः | चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली |
| 3. अभिज्ञानशाकुन्तलम् | महाकविः कालिदासः | वि.वि.मुखर्जी पब्लिकेशन्, कोलकाता |
| 4. भाषासौरभम् | शिक्षक शिक्षा निर्देशालय | ओडिशा विद्यालय शिक्षा प्राधिकरण, भुवनेश्वरम् |


**पाद टिप्पणी**

[1]बु.भि.पा पृ - २०

[2]बु.भि.पा पृ - २०

[3]तत्रैव

[4]तत्रैव

[5]बु.भि.पा पृ -२०

[6]तत्रैव

[7]बु.भि.पा पृ -२०

[8]तत्रैव

[9]ऋ.वे

[10]भाषासौरभम्- पृ- ३

[11]बु.भि.पा पृ - ३४

[12]तत्रैव

[13]अभि.शा. ४/९

[14]बु.भि.पा पृ - ३४

[15]हितोपदेशः १/१७७

[16]बु.भि.पा पृ - ३४